MURALIDHAR GIRLS' COLLEGE
LIBRARY

# 2022

## SANSKRIT — HONOURS

**Paper : CC-5**

**[Classical Sanskrit Literature (Drama)]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 25)**

**Unit - I**

1. (a) अधःप्रदत्तेभ्यः यथेष्ट***मेकस्यैव*** मातृभाषया अनुवादः कर्तव्यः। 5

(i) परिहरतु भवान् नृपापवादं न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते वनमधिगम्य मनस्विनो वसन्ति।।

(ii) विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशः
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।।

(b) निम्नलिखितेभ्यः श्लोकेभ्यो यथाभीष्ट***मेकस्यैव*** देवनागरलिप्या सुरगिरा च सप्रसङ्गं व्याख्या विधेया। 6

(i) प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।

(ii) कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च।।

(c) अधोलिखितेषु प्रश्नेषु ***त्रयाणामेवोत्तरं*** देवनागरलिप्या संस्कृतभाषया च संक्षेपेण लेखनीयम्। 2×3

(i) कस्य महाराजस्य महामन्त्री यौगन्धरायणः? यौगन्धरायणः कया सह तपोवनमागतः?

(ii) पद्मावती कस्य राज्ञः भगिनी? सा किमर्थं तपोवनम् आगतवती?

(iii) "अत्याहितम्" इति कस्मिन् प्रसङ्गे कस्याः कथनमिदम्?

(iv) कस्मिन् प्रसङ्गे "एतदपि मया कर्तव्यम् आसीत्, अहो! अकरुणाः खल्वीश्वराः" –इति वासवदत्ता उक्तवती?

(v) "स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्" कं प्रति कस्योक्तिरियम्?

Please Turn Over

MURALIDHAR GIRLS' COLLEGE
LIBRARY

## Unit – II

2. अधोलिखितेषु प्रश्नेषु कस्य***चिदेकस्यै***व उत्तरं लेखनीयम्। 8×1

(a) "सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव॥"
– उक्तेरस्याः याथार्थ्यं स्वप्नवासवदत्तमिति नाटकमवलम्ब्य विचार्यताम्।

(b) वासवदत्तायाः चरित्रचित्रणं पठितग्रन्थदिशा क्रियताम्।

## Section – B

**(Marks : 25)**

## Unit – I

3. अधःप्रदत्तेषु ***द्वयोः*** संस्कृतभाषया देवनागरलिप्या च टीका लेखनीया। 5×2

(a) प्रवेशकः

(b) विदूषकः

(c) नेपथ्यम्

(d) भरतवाक्यम्।

## Unit – II

4. (a) अधोलिखितेषु श्लोकेषु कस्य***चिदेकस्यै***व मातृभाषया अनुवादः कर्तव्यः। 5

(i) न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥

(ii) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(b) अधोलिखितेषु श्लोकेषु कस्य***चिदेकस्यै***व देवनागरलिप्या संस्कृतभाषया च सप्रसङ्गं व्याख्या कार्या। 6

(i) विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY



(ii) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्ते ह्यन्यतेजोऽभिभवाद्दहन्ति॥

(c) (i) कस्य*चिदेकस्यैव* विग्रहवाक्यं विलिख्य समासनाम देवनागरलिप्या संस्कृतभाषया च लिख्यताम्। 2

शमप्रधानेषु 4.(b)(ii) प्रश्ने

अनन्यमानसा 4.(b)(i) प्रश्ने।

(ii) संस्कृतभाषया देवनागरलिप्या च कस्य*चिदेकस्य* व्युत्पत्तिः निर्णेया। 1

सन्निपात्यः 4.(a)(i) प्रश्ने

वेत्सि 4.(b)(i) प्रश्ने।

(iii) संस्कृतभाषया देवनागरलिप्या च कस्य*चिदेकस्य* कारकविभक्तिः निर्णेया। 1

तपोधनेषु 4.(b)(ii) प्रश्ने, मृगशरीरे 4.(a)(i) प्रश्ने।

**Section – C**

**(Marks : 15)**

**Unit – I**

5. अधोलिखितेषु प्रश्नेषु कस्य*चिदेकस्यैव* उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्।

(a) कासीत् हंसपदिका? नाटकस्य कस्मिन्नङ्के तस्याः गानं श्रूयते? गानस्यास्य तात्पर्यम् आलोच्यताम्। 1+1+8

(b) दुष्यन्तशकुन्तलयोर्मिलनवृत्तं ग्रन्थानुसारं प्रतिपाद्यताम्। 10

*अथवा,*

अधःप्रदत्तेषु प्रश्नेषु *पञ्चानाम्* उत्तरं देवनागरलिप्या संस्कृतभाषया च लेख्यम्। 2×5

(a) शकुन्तलायाः अङ्गुरीयकं कुत्र भ्रष्टं? केन तत् प्राप्तम्?

(b) कुत्र मारीचाश्रमः अस्ति? मारीचः कस्य पुत्रः?

(c) केन कथं च मातलिः दुष्यन्तसकाशं प्रेरितः?

(d) मारीचः शकुन्तलायै का आशीः प्रायच्छत्?

(e) मारीचवचनानुसारं दुष्यन्ते किं त्रितयं समागतम्?

(f) का ओषधिः सर्पो भूत्वा दशति? कस्मै ओषधिरियं प्रदत्ता?

(g) अदितिः का? सा कस्य पत्नी?

MURALIDHAR GIRLS' COLLEGE
LIBRARY



## Unit – II

6. अधःप्रदत्तेषु ***पञ्चानां*** प्राकृतशब्दानां संस्कृतरूपं देवनागरलिप्या लिख्यताम्। 1×5

(a) तह

(b) दाव

(c) अज्जस्स

(d) भविस्सदि

(e) कहेहु

(f) हिअअं

(g) आणवेदु।

MGC Library